ग्रन्थनाम. न्यायसिद्धान्तमुक्तावली

ग्रन्थकार. विश्वनाथ पञ्चानन भट्टाचार्य।

अनुमान खण्ड पूर्ण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1463

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योत्पत्तौ बाधकाभावे न रक्तोत्पत्तिक्षण एव द्व्यारंभानुगुणक्रियोत्पत्तिः संभवतीत्यभिप्राये
ण समर्थनीयाविभावेन विभागजननमिति कारणमात्रविभागेन कारणाकारणविभा
गजनने सतीत्यर्थः विभागजविभागाविति आरम्भकसंयोगनाशस्य तत्तीयक्षण एवोत्प
न्नतया चतुर्थक्षणे परमाण्वाकाशविभागः सम्भवतीति भावः ततः श्यामनाशपूर्व
संयोगनाशाविति परमाणश्यामनाशपरमाण्वाकाशसंयोगनाशावित्यर्थः परमा
णश्यामनाशं प्रति द्व्यणुकनाशस्य हेतुत्वानभ्युपगमे परमाश्यामनाशासम्भवात् इतिभा
वः रक्तोत्पत्त्युत्तरसंयोगाविति उत्तरसंयोगेविनाश्यपूर्वकर्मनाशासंभवेन द्व्यारम्भानुगुण
क्रियानुत्पत्तेरिति भावः एवमग्रेपि तत्रैव एवाग्निसंयोगो द्व्यणुकनाशकः स एव श्या
मनाशोत्तररक्तोत्पादे चे हेतुरिति केषांचिन्मतं पुनरप्यन्तरसंयोगादिति भाष्यविरुद्धं ना
दरणीयमित्यभिप्रेत्याह मध्यमशब्दवदिति एकस्मादिति द्व्यणुकनाशकादेकस्मादि
त्यर्थः यथा मध्यमशब्दात्पूर्वे शब्दनाशोत्तरशब्दोत्पादौ भावतस्तथैकस्माद्व्यणुकना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1465

मु.

नप्रतिबंधः क्रियते विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी अयं च साध्याभा
वग्रहसामग्रीत्वेन प्रतिबंधकः सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः अत्र तु
हेतुरेक एवेति विशेषः साध्याभावसाधक एव हेतुः साध्यसाधकत्वेनोपन्यस्तः इ
ति अशक्तिविशेषो व्यापकत्वांशे विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः
अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीनागृहीताप्रामाण्यकत
दभावव्याप्यवत्त्वोपस्थितिविषयत्वमित्यन्ये ॥ अत्र तु परस्पराभावव्याप्यव
त्ताज्ञानोत्तरपरस्परानुमितिप्रतिबंधः फलम् अत्र केचित् यथा घटाभावव्या
प्यवत्ताज्ञानेपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते यथा च शंखे सत्य
पि पीतत्वाभावव्याप्यशंखत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शंख इति धीरेवं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1466

तिबंधकं तेन एकहेतौ व्यभिचारज्ञाने हेत्वंतरेणानुमित्युत्पत्तेस्तदभावायनव्याहेत्वाश्च
व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेपि न क्षतिरिति संक्षेपः यादृशसाध्यपक्षकहे
तौ यावंतो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वं पंचत्वकथनं तत्संभवस्थलाभिप्राये
क ण एवं साधारणाद्यन्यतमत्वमनैकांतिकत्वं साधारणः साध्यवदन्यवृत्तिस्तेन च व्या
प्तिज्ञानप्रतिबंधः क्रियते असाधारणः साध्यासमानाधिकरणः तेन साध्यसामाना
धिकरण्यग्रहः प्रतिबध्यते शब्दो नित्यः शब्दत्वादित्यादावसाधारणः अन्ये तु सप
क्षावृत्तिर्हेतुरसाधारणः सपक्षश्च निश्चितसाध्यवान् इत्थं च शब्दो नित्यः शब्दत्वा
दित्यादौ पक्षे यदा साध्यनिश्चयस्तदा नासाधारण्यं तत्र हेतोर्निश्चयादिति वदंति
अनुपसंहारी चात्यंताभावाप्रतियोगिसाध्यकादिः अनेन व्यतिरेकव्याप्तिज्ञा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रु.

1467

स्यापि अनित्यदोषत्वापत्तेः तस्मात् तत्र वन्ह्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वन्हिव्या
प्यधूमस्य नाभासत्वं धूमादनुमितिप्रतिबंधमात्रम् हेतुस्तु न दुष्टः इत्थं च साध्याभाववद्वृत्ति हे
त्वादिकं दोषः तद्वत्वं च हेतौ येन केन संबंधेनेति नव्याः परे तु पक्षविषयकत्वेन ज्ञानस्यानुमि
तिविरोधित्वं तद्वत्वं हेत्वाभासत्वं सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा तद्वत्वं च हेतोर्ज्ञा
नरूपसंबंधेन नचैवं वन्हिमान्धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेना त
नुमितिविरोधित्वात् ज्ञानरूपसंबंधेन तद्वत्वस्यापि सद्धेतोरपि बाधितत्वापत्तिरिति वा तैस्तत्वा
त द
च्यम् तत्र ज्ञानस्य संबंधत्वाकल्पनात् अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्
तत्र बाधित इति व्यवहाराभावादित्याहुः अनुमितिविरोधित्वं च अनुमितितत्करणान्यत
ज्ञान रविरोधित्वं तेन व्यभिचारिणि नाव्याप्तिः दोषज्ञानं यद्धेतुविषयकं तद्धेतुकानुमितौ प्र

राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हेतुप्रसंगाद्धेत्वाभासान् विभजते अनैकांतो विरुद्धश्चाप्यसिद्धः प्रतिपादितः कालात्ययपा
पदिष्टश्च हेत्वाभासाश्च पंचधा आद्यः साधारणस्तु स्यादसाधारणकोऽपरस्तथैवानुपसंहा
री त्रिधानैकांतिको भवेत् २२॥ तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वं
तत्त्वं हेत्वाभासत्वं तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वात्ते दोषाः
यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यम् तेन बाधभ्रमस्यानुमितिविरोधित्वेपि न
क्षतिः तत्र पर्वतो वन्ह्यभाववानिति विशिष्टस्याप्रसिद्धत्वात् न दोषः न च पत्र वन्ह्यभा
वव्याप्यपाषाणमयत्ववानिति परामर्शकाले वन्हिव्याप्यधूमस्याभासत्वं न स्यात् तत्र व
न्ह्यभावव्याप्यवान्पर्वत इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् इष्टापत्तेः अथवा बाध

1468

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1469

मु· नात्संशयः नान्यथा अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति असि
द्धिस्तु आश्रयासिद्ध्याद्यन्यतमा आश्रयासिद्धिः पक्षे पक्षतावच्छेदकाभावः यत्र कां
चनमयः पर्वतो वह्निमानिति साध्यते तत्र पर्वतो न कांचनमय इति ज्ञाने विद्यमाने
कांचनमये पर्वते परामर्शादिप्रतिबंधः फलम् स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिम
तस्याभावः अत्र ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते
पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबंधः फलम् साध्याप्रसिद्ध्याद
यस्तु व्याप्यत्वासिद्धिमध्ये अंतर्भूताः साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसि
द्धिः एतज्ज्ञाने जाते कांचनमयवह्निमानित्यादौ साध्यतावच्छेदकविशिष्टसा
ध्यपरामर्शप्रतिबंधः फलम् एवं च हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कोटिद्वयव्याप्यदर्शनेपि कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थ
ले संशयरूपानुमितिर्भवत्येव यत्र च एककोटिव्याप्यदर्शनं तत्राधिकबलतयाद्विती
यकोटिमानप्रतिबंधान्न संशयः फलबलेन चाधिकबलत्वसमबलभावः कल्प्यते
इत्याहुः तन्न तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधा
देरनुदयात् लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबंध
कतालाघवात् नतूपनीतभानविशेषे शाब्दबोधे च पृथक् प्रतिबंधकता गौर
वात् तथा च प्रतिबंधकत्वात्कथमनुमितिः न हि लौकिकसान्निकर्षस्थले प्र
त्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्न
त्वेनापि विशेषणीयम् यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञा

1470

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

147

मु.

किंतु भ्रमत्वज्ञानानास्कंदितबाधबुद्धेः प्रतिबंधकता तत्र भ्रमत्वशंकाविघटनेन प्रामाण्य
ज्ञानं क्वचिदुपयुज्यते न च बाधस्थले पक्षे हेतुसत्वे व्यभिचारः पक्षे हेत्वभावे स्वरूपासिद्धिरेव
दोष इति वाच्यम् तथापि बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात् किंच पक्षपरामर्शानंतरं बाधबु ना
वार द्धिस्तत्र व्यभिचारज्ञानादेरकिंचित्करत्वात् बाधस्यानुमितिप्रतिबंधकत्वं वाच्यम् एवं पक्षोत्प
त्तिक्षणावच्छेदेन घटो गंधव्याप्यपृथिवीत्ववानिति ज्ञानं तत्र बाधस्यैव प्रतिबंधकत्वं वाच्यम्
न च पक्षे घटे गंधसत्वात् कथं बाध इति वाच्यं पक्षतावच्छेदकदेशकालावच्छेदेनानुमि
तेरनुमित्वसिद्धत्वादिति बाधतथाव्यभिचारापेहेत्वाभासात्तथाप्यात्रापि तन्मध्य एवां
र्भवंति अन्यथा हेत्वाभासाधिक्यप्रसंगात् बाधव्याप्यः सत्प्रतिपक्षो भिन्न एव स्वतंत्रे
च्छेन मुनिनापृथगुपदेशात् सत्प्रतिपक्षव्याप्यस्तु न प्रतिबंधकः इति प्रघट्टकार्थः राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा कांचनमयधूमादिस्थादौ हेतुतावच्छेदकावशिष्टहेतुज्ञानाभावात् तद्धेतुकव्याप्ति
ज्ञानादेरभावः फलं एवं च मन्दिमा नीलधूमादिस्थादौ गुरुतया नीलधूमत्वस्य हेतु
तानवच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदंति बाधस्तु पक्षे साध्याभावादिः पक्षे साध्यवदन्य
मि एतस्यानुमितिप्रतिबंधः फलम् तर्द्धिकतदभावनिश्चयो लौकिकसंनिकर्षाजन्यदोषादिवोऽ
घविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति ननु संशयपक्षताधारणेयं पक्षे साध्यसंशय
त्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम्
अप्रसिद्धसाध्यकानुमित्यनापत्तेः साध्यसंशयादिकं विनापि अनुमित्युत्पत्तेश्च एवं
साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबंधकम् प्रमाणाभावाद्गौरवाच्च अन्यथा
सत्प्रतिपक्षादावपि तदभावव्याप्यज्ञाने प्रमात्वविषयकत्वेन प्रतिबंधकतापत्तेः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1473

पः सपक्षे विपक्षे च समवेत्साधारणस्तु सः सपक्षविपक्षवृत्तिः साधारण इत्यर्थः सपक्षः
निश्चितसाध्यवान् विपक्षः साध्यवद्भिन्नः विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम् वस्तुतो
विपक्षवृत्तित्वमेव वाच्यम् विरुद्धस्य साधारणत्वेपि दूषकताबीजस्याभिन्नतया तस्यापा
र्थक्यात् यस्तूभयस्माद्व्यावृत्तः सत्वसाधारणोमतः सपक्षविपक्षव्यावृत्त इत्यर्थः
सपक्षः साध्यवत्तया निश्चितः विपक्षः साध्यशून्यतया निश्चितः शब्दोऽनित्यः श
ब्दत्वादित्यादौ यदा शब्देऽनित्यत्वसंदेहः तदा सपक्षत्वम् घटादीनामेव तद्व्यावृत्तं च द
शब्दत्वमिति तदा तदसाधारणम् यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधा
रणः इदं तु प्राचां मतम् नवीनमतं तु पूर्वमुक्तं तथैवानुपसंहारी केवलान्वयि
पक्षकः सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1474

मु

स्थलांतराभावान्नानुमितिः इदंतु न सम्यक् पक्षैकदेशे सहचाराग्रहेपि तत्तेरभावात् अ
नुसहचाराग्रहः तावता व्यवृत्तानहपासिद्धिरेव न तु हेत्वाभासत्वं तस्य तु व्यापिकेवला
न्वयिताव्यकत्वं तथात्वाभिधुकस्य पः साध्यवति नैवात्तीत्स विरुद्ध उदाहृतः एवका
रेण साध्यवत्वावच्छेदेन हेत्वभावबोधितः तथा च साध्यव्यापकीभूताभावप्रतियोगि
त्वमत्रदर्थः आसिद्धिं विभजते आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरपरा व्या
प्यत्वासिद्धिरपरा स्यादासिद्धिरतास्त्रिधा १५ पक्षासिद्धिर्यत्र पक्षो भवेन्माणिमयो
गिरिः पक्षासिद्धिराश्रयासिद्धिरित्यर्थः ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा
अपरा स्वरूपासिद्धिरित्यर्थः व्याप्यत्वासिद्धिरपरा नीलधूमादिकं भवेत् नील
धूमत्वं गुरुत्वान्न हेतुतावच्छेदकम् विलक्षणोः परामर्शोत्पत्तेः तत्रातिपादीता १३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1475

११ कपिसंयोगसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षत्वमत उक्तम्
विरुद्धयोरिति तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्य
व्याप्यवत्तामर्शविषय इत्यर्थः साध्यशून्यो यत्र पक्षस्त्वसौ वाध उदाहृतः उत्पत्तिका
लीनघटे गंधादिर्य्यत्र साध्यते १८ पक्षः साध्यतावच्छेदकाविशिष्ट इत्यर्थः तेन
घटे गंधसत्वेऽपि न क्षतिः एवं मूलावच्छिन्नो वृक्षः कपिसंयोगी त्यत्रापि वोध्यम्
॥ इति श्रीमुक्तावल्यामनुमानपरीच्छेदः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ॰

1476

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA